www.prepp.in



# संस्कृतम्

## ( अनिवार्यम् )

समयः होरात्रयम् (घण्टा-त्रयम्)

पूर्णाङ्काः 300

### प्रश्नपत्रविषये विशेषनिर्देशाः

**प्रश्नानां समाधानात् प्राक् सर्वेऽपि अधोलिखिताः निर्देशाः सावधानतया पठनीयाः**

सर्वेऽपि प्रश्नाः समाधेयाः।

प्रत्येकं प्रश्नस्य/प्रश्नभागस्य अङ्काः तत्पुरत एव निर्दिष्टाः।

यदि अन्यथा निर्देशो न भवेत् तर्हि प्रश्नानाम् उत्तराणि संस्कृतभाषया एव देवनागरीलिपिनिबद्धया लेखनीयानि।

यत्रापि शब्दसीमा निर्धारिता तत्र सा अनुपालनीया एव। उत्तराणि चेत् सीमातः अधिकमात्रया विस्तीर्णानि लघुतराणि वा भवेयुः तदा अङ्कहानिः भविष्यति।

प्रश्नपत्रसहितोत्तरपुस्तिकायाः किमपि पृष्ठं पृष्ठांशो वा यदि रिक्तः त्यज्यते सः अवश्यं स्पष्टतया रेखाचिह्नेन निरसनीयः।

प्रश्नक्रमानुसारमेव क्रमेण प्रश्नोत्तराणि प्रदेयानि। नोचेत् अंशतः प्रदत्तं प्रश्नोत्तरमपि संपूर्णप्रश्नोत्तरवत् भवेत्।

# SANSKRIT

## ( Compulsory )

Time Allowed : Three Hours

Maximum Marks : 300

### QUESTION PAPER SPECIFIC INSTRUCTIONS

**Please read each of the following instructions carefully before attempting questions**

All questions are to be attempted.

The number of marks carried by a question/part is indicated against it.

Answer must be written in SANSKRIT (Devanagari script) unless otherwise directed in the question.

Word limit in questions, wherever specified, should be adhered to and if answered in much longer or shorter than the prescribed length, marks may be deducted.

Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.

Attempts of questions shall be counted in sequential order. Unless struck off, attempt of a question shall be counted even if attempted partly.

www.prepp.in

1. अधोलिखितेषु विषयेषु कमपि **एकं** विषयमधिकृत्य षट्शत-शब्दैः (*600* परिमितशब्दैः) निबन्धो लेखनीयः — 100

(*a*) सर्जनात्मकतायाः संपोषकशिक्षायाः आवश्यकता

(*b*) भारते वन्यजीवनसंरक्षणाय समाह्वानानि

(*c*) किशोराणां मानसोपरि चलचित्राणां प्रभावः

(*d*) दिव्यांगानां जनानां सशक्तीकरणम्

2. अधोलिखितं गद्यांशं सावधानं पठित्वा तदनुसारं तदधस्ताद् प्रदत्तानां प्रश्नानामुत्तराणि स्पष्टतया संक्षेपतश्च स्वगिरा साधु दीयताम्— 12×5=60

कतिपयेभ्यः सहस्रवर्षेभ्यः पूर्वं मनुष्यः पृथिव्याः उपरि केवलम् आखेटकः आसीत्। नवपाषाणयुगं यावत् सः कृषिकर्मणे एकस्मिन् स्थाने न निवसति स्म। दूरदूरस्थानेषु विभ्रमणं विना सः क्षेत्राणां कर्षणं कृत्वा भोजनसमस्या-निवारणाय सक्षमः अभवत् एवं क्रमानुसारं कृषिकार्यस्य समुन्नतये प्रयत्नरतः अभवत्। अद्यावधि सः पूर्वस्य तुलनया अधिकस्य उत्तमस्य च भूमिजवस्तुनः उत्पादनकार्ये समर्थः अभवत्। किन्तु न तथा समुद्रविषये, तस्मिन् विषये स अद्यावधि आखेटकः अस्ति। सः मत्स्यान् तथा अन्यान् जलजीवान् परिगृह्णाति किन्तु तेषां सन्ततं समृद्ध्ये तथा आपूर्तये सीमितमेव प्रयत्नं करोति। अद्यावधि जलीयाखेटनात् तस्य अत्यधिकस्य पौष्टिकखाद्यसारस्य अत्यधिकतया आपूर्तिः भवति स्म। अयमेव भूकृषितः प्राप्तखाद्यसारपूर्तेः पूरकः अस्ति। किन्तु संसारे वर्धमानायाः लोकसंख्यायाः कारणात् मनुष्याय शीघ्रमेव समुद्रेभ्यः प्राप्तः खाद्यसारः न पर्याप्तः भवेत्। ततोऽधिकस्य खाद्यसारस्य आवश्यकता भविष्यति। तस्येयम् अधिका तथा निरन्तरप्राप्यमाणा आपूर्तिः अपि संकटापन्ना भविष्यति। अतएव मनुष्यः सामुद्रिकखेटनात्मकेन कृषिकर्मणा पर्याप्तखाद्यसारापूर्तये प्रयत्नशीलः भवेत्।

लघुस्तरे मत्स्यपालनं तडागेषु तथा ह्रदेषु साफल्येन कृतम् अस्ति। विशेषरूपेण जलविद्युत्परियोजनाभ्यः महासेतूनां विनिर्माणद्वारा निर्मितेषु कृत्रिमजलाशयेषु इदं कार्यं कृतम् अस्ति। अम्लानजलपूरितेषु जलाशयेषु मत्स्योत्पन्नस्य खाद्यसारस्य पूर्वापेक्षया वृद्धिः जाता। तेषु कतिपयानां विकासः ग्रामीणसमुदायेषु कृषिकार्ये नियुक्तानाम् अधिकारिणां साहाय्येन पर्यवेक्षणेन च भवति।

मत्स्यजलाशयानां युवमत्स्यानां सकृत् पूरणेन कृतायां समृद्ध्यां मत्स्यानां स्वस्थवातावरणे विकासः संभवः भवति, तेषां भोजनस्य च पर्याप्ता आपूर्तिः अपि भवति। जले अधिकसंख्यायां सन्तरन्तः प्लवकाः —सूक्ष्माः जीवाः वनस्पतयश्च—जलीयानां प्राणिनां कृते प्रमुखं खाद्यम् अस्ति। लघुमत्स्याः तत् खादन्ति एवं च तेऽपि महामत्स्यानां खाद्यं भवन्ति। प्लवकाः जले विद्यमानेभ्यः खनिजपदार्थेभ्यः संवर्धन्ते। एतदर्थं प्लवकानां मात्रा जले प्रयुक्तेन अतिरिक्तैः उर्वरकैः वर्धयितुं शक्यते।

यद्यपि सागरीया कृषिः व्यावहारिकी लाभदायिनी च भवितुं शक्नोति परम् एतत्पूर्वम् अनेकासां समस्यानां समाधानं कर्तव्यम्। उदाहरणरूपेण तु सागरस्य तस्मिन् भागे उर्वरकप्रक्षेपणस्य उपयोगिता नास्ति यत्र सागरस्य धाराः तीव्रगत्या उर्वरकान् क्रोशादपि अतिदूरे विद्यमानान् अनुत्पादकजलभागान् प्रति क्षिपन्ति। यदि मत्स्यपालकाः उर्वरकान् एकस्मिन् मर्यादितक्षेत्रे अवरोद्धुं शक्नुवन्ति तथापि तैः 'स्वक्षेत्रं' यावत् उर्वरकपोषितमत्स्यानां रक्षणकौशलम् अन्वेषणीयम्। तथा स्वव्ययस्य

www.prepp.in

Prepp
Your Personal Exams Guide

अधिकतमस्य प्रतिदानस्य प्राप्तये तैः मत्स्येभ्यः भोजनं दातुम् एतादृशस्य उपायस्य अन्वेषणं कर्तव्यं येन तद् भोजनं तैरेव मत्स्यैः उपलभ्येत यान् ते भोजयितुं कामयन्ते। मत्स्यपालकः अखाद्यरूपाणां जलजीवानां परिहारोपायं—शैवालादिवर्जनकर्म (weeding) अवलम्बेत् येन तस्य मत्स्यानां भोजनम् अन्यैः न प्राप्यते।

स्पष्टरूपेण कथयितुं शक्यते यत् एतादृशानां समस्यानां निराकरणं न सहजं न सरलं च। विशेषरूपेण सागरस्य अपारताम् अवलोकयन् एतत्सुतरां सत्यं यतो हि सागरः पृथिव्यपेक्षया त्रिगुणीकृतः वर्तते। समुद्रस्य जलं तडागेभ्यः महाह्रदेभ्यश्च अस्मिन्विषये भिन्नम् अस्ति यत् तत् धारासु एव निरन्तरं गतिशीलं भवति। शनैः शनैः एतासां समस्यानां समाधानं संभाव्यते। आगामिनि काले मनुष्यः महाद्वीपानां निकटे विद्यमानेषु अपतटीयजलक्षेत्रेषु मत्स्यपालनं लघुस्तरे कर्तुं शक्नोति। सः एतादृशानां मत्स्यानां संग्रहं कर्तुं शक्नोति येषाम् उत्पादनं कर्तुं स इच्छति एवं च निजमत्स्यानां भोजनस्य भक्षकान् अवाञ्छनीयान् जलजीवान् वर्जयितुमपि प्रभवति। आवश्यकतानुसारं तस्मिन् क्षेत्रे उर्वरकान् प्रक्षेप्तुं शक्नोति तथा अन्ततः समये समये परिपक्वमत्स्यान् शस्यरूपेण प्राप्तुं शक्नोति।

*(a)* आखेटनस्य तुलनया कृषिः कथं लाभकारिणी स्यात् एवं च आगामिनि काले सागरीया कृषिः परमावश्यकी प्रतीयते?

*(b)* मत्स्यपालनाय उर्वरकाणां का भूमिका विद्यते?

*(c)* समुद्रस्य कस्मिन् भागे मत्स्यपालनं प्रारब्धुं शक्यते?

*(d)* शैवालवर्जनकर्म (Weeding)-पदेन किम् अवबुध्यते?

*(e)* आगामिनि काले समुद्रकृषिकर्मणः समस्यानां समाधानं कथं कर्तुं शक्यते?

**3.** अधस्तनगद्यभागस्य संक्षेपः मूलभागस्य तृतीयांशपरिमितो स्वशब्दैरेव लेख्यः। शीर्षको न प्रदेयः — 60

भारतस्य विशाला जनसंख्या ग्रामेषु वसति। तेषां सामाजिक-आर्थिकस्थित्यां एवं च तेषां जीवनस्य गुणवत्तायां वृद्धये ग्रामाणां मूलभूतानाम् उपकरणानां सर्वांगीणविकासस्य आवश्यकता अस्ति। येन दीर्घकालाद् अभीष्टास्य समानस्य समावेशिनश्च विकासस्य प्राप्तिः भवितुं शक्नोति। ग्रामस्य मूलभूतस्य अधिष्ठानस्य एकं महत्त्वपूर्णं घटकम् अस्ति पेयजलव्यवस्था। जलं निःसन्देहम् एका महत्त्वपूर्णा लोकसम्पत्तिः। नागरिकाणां प्रयोजनस्य परिपूरणार्थं जल-व्यवस्थायाः निर्माणाय सार्वजनिके निवेशे वृद्धिः आवश्यकी अस्ति। जलदृष्ट्या सुरक्षितं राष्ट्रं न केवलं निज-नागरिकान् निर्मलं तथा निरापदं पानीयजलं प्रापयितुं शक्नोति, अपितु एकं निरामयं अर्थोत्पादकं च समाजं निर्मातुं शक्नोति। यद्यपि भारतीयायाः विशालायाः ग्रामजनतायाः पानीयजलावश्यकतायाः समाधानकार्यम् अतीव कठिनम् अस्ति। तस्य प्रमुखं कारणं पानीयजलापूर्तये स्थापितानां संस्थानां क्षमताभावः, सामाजिकार्थिकविकासस्य निम्नः स्तरः तथा च जलविनियोगव्यवहारे जागरूकतायाः अभावः।

संविधानस्य सप्तचत्वारिंशत्तमः अनुच्छेदः राज्यान् सार्वजनीनस्वास्थ्यस्य उन्नतये निर्मलम् अगदकरं च जलं प्रापयितुम् आदिशति। परिष्कृतपेयजलव्यवस्था रोगाणां तथा घातकघटनानां ह्रासाय भवति जीवनस्तरस्य उन्नतौ च साहाय्यकारिणी। राष्ट्रस्य अनेककोटिसंख्याकायाः जनतायाः स्वास्थ्ये परिशोधनाय स्वच्छस्य सुरक्षितस्य च पानीयजलस्य आवश्यकता अस्ति। तेन साकं स्वच्छतायाः आवश्यकता अपि अस्ति। तस्याः अपि प्रावधानं महत्त्वपूर्णम् अस्ति।

www.prepp.in

व्यवस्थिताय विकासाय स्वच्छता, व्यवस्थितजलव्यवस्थायाः च दृढीकर्तव्या। अस्य कथनस्य अयमाशयः यत् निर्मलजलप्राप्तिविषये न कोऽपि वञ्चितो भवतु। गतवर्षे मार्चमासस्य द्वाविंशतितमे दिनांके 'विश्वजलदिवस'रूपेण सम्मानिते दिवसे अयमेव प्रमुखः विषयः आसीत्।

सर्वकारः ग्रामजनान् निर्मलजलं प्रापयितुं विशेषप्रयत्नं कुर्वन्नस्ति। काले काले अस्मिन् क्षेत्रे आगतानां समस्यानां समाधानाय महत्त्वपूर्णाः उपक्रमाः अपि विचार्यन्ते। आवश्यकी धनराशिः अपि प्रदीयते ग्राम्यजलापूर्तिव्यवस्थायै। तथा च भूगर्भजलस्य संरक्षणाय पुनर्भरणाय च अनेकाः योजना अपि परिगृहीताः सन्ति। अन्येऽपि समुचिताः योजनाः परिचाल्यन्ते। तेषु वृष्टिजलसंरक्षणं विविधेषु उपक्रमेषु महत्त्वपूर्णम् अस्ति।

ग्रामाञ्चलेषु सुरक्षितपानीयस्य आपूर्तये अयं समुचितः कार्यक्रमः। सर्वकारः जलस्य कृत्रिमपुनर्भरणाय वृष्टिजलरक्षण-संरचनायाः निर्माणाय चापि कार्यं करोति। भारते अनेकाः सफलाः कथाः प्राचुर्येण सन्ति याः जलसंचयनविषये अस्माकं पारम्परिकं ज्ञानं विवेकं च संसूचयन्ति। २००१ तमे वर्षे तमिलनाडु-सर्वकारः प्रत्येकं गृहस्थाय वृष्टिजलसंरक्षणाय आधारभूतां संरचनाम् अनिवार्यं कृतवान्। एतादृशः प्रयोगो बेंगलोरनगरे पुणेनगरे चापि कृतः यस्मिन् तत्रत्यानां गृहनिर्माणसमितीनां कृते वर्षाजलसंरक्षणं अनिवार्यमस्ति। एतादृशाः अनेके उपक्रमाः अन्येषु राज्येषु अपि प्रचलन्ति।

भूजलस्य अतिदोहनं भारते एका प्रमुखसमस्या। अस्य निरोधाय राज्यसर्वकारद्वारा विनिर्मितस्य नियामकतन्त्रस्य अस्ति आवश्यकता। अतिप्रभावितेषु ग्रामीणक्षेत्रेषु कूपेभ्यः अतिनिष्कासनमपि नियन्त्रयितव्यम्। पानीयजलापूर्तये प्रचलिताः योजनाः प्रभावशालिन्यः विधातुं पञ्चायतन-संस्थानाम् अधिकसंविभागितायाः अपि अस्ति आवश्यकता। अधुना पञ्चायतराजसंस्थानां भूमिका अतिन्यूना अस्ति। ग्रामीणसमुदायानां असर्वकारीयसंस्थानानाम् एवं च सुविधादातृरूपेण सहायकवित्तदातृरूपेण च सर्वकारस्य मध्ये संभागिता सफलतया कार्यं कृतवती। इदम् अस्माभिः स्मरणीयं यत् ग्रामाञ्चलेषु पानीयजलस्य अभिगमनमार्गाय, उपलब्धये, जलसंरक्षणाय, जलाशयानां समुचितव्यवहाराय च ग्रामसमुदायानां सहयोगेन सर्वप्रकाराः प्रयत्नाः अस्माभिः कर्तव्याः।

जनसमुदायास्य सहभागिता प्रयोगस्य स्थितिस्थापनस्य च अर्थनैतिकीं व्यावहारिकतां वर्धयति। तेन प्रचलितया पद्धत्या स्थितिस्थापनस्य जीवनकालः अपि वर्धते। जलस्रोतसां परिसरेषु स्वच्छस्य स्वास्थ्यानुकूलस्य च वातावरणस्य निर्माणे जनसमुदायानां महती भूमिका विद्यते।

न केवलम् एतावत् अपितु जलसंग्रह-संरक्षण-व्यवहारकाले प्रदूषणनिवारणाय व्यवस्था अपि कर्तव्या। ग्रामीणेषु क्षेत्रेषु एतासां योजनानां प्रभावशालिनः कार्यान्वयनाय पंचायतनसंस्थानां, स्वयं सेवकसमूहानां सहकारीसमितीनां च सक्रिया सहभागिता अपेक्ष्यते येन २०३० वर्षं यावत् 'जलमस्तु प्रतिगृहम्' इति लक्ष्यं वयं साधयामः एवं च दीर्घायु समाधानं प्राप्नुयाम।

**4.** अधःस्थगद्यभागस्य आङ्गलभाषया अनुवादः कर्तव्यः — 20

यदा कोऽपि जनः आत्मानं पश्यति तदा सः स्वविषये अयथार्थम् आकलनं करोति। बहुतराणां जनानाम् उत्तमा आशयाः भवन्ति। अतः ते एवं विचारयन्ति यत् ते यद् यत् कुर्वन्ति तस्य तस्य फलमपि हितकरं भवेत्। कस्यापि जनस्य कृते निजकर्मणः तटस्थतया मूल्याङ्कनं दुष्करम्। इदं संभाव्यते प्रायशः च इदमेव भवत्यपि यत् तस्य शुभाशयेषु कर्मसु च विरोध एव जायते। अधिकतराः जनाः कार्यस्य संपादनस्य प्रयोजनेनैव विचारेण कार्यं प्रारभन्ति। ते स्वकार्यं तया पद्धत्या कुर्वन्ति या तेषां सौविध्यकारिणी प्रतीयते। सायंकाले ते सन्तोषस्य भावनया साकं गृहं गच्छन्ति। ते स्वकर्मणः मूल्याङ्कनं न कुर्वन्ति। ते

www.prepp.in

Prepp
Your Personal Exams Guide

स्वकीयानाम् आशयानामेव मूल्यनिर्णयं कुर्वन्ति। प्रायः कोऽपि जनः समयेन कार्यं समापयितुम् इच्छति। तस्मादिदं स्वीक्रियते यत् यदि विलम्बो जातः तदा तस्य विलम्बस्य कारणानि न तस्य वशे भवन्ति। विलम्बाय तस्य आशयः नासीत् किन्तु यदि तस्य कार्यपद्धत्या आलस्येन वा विलम्बो भवति किं तत् अभिप्रायपूर्वकं नासीत्?

वस्तुतः इयमस्ति समस्या यत् वयं जीवनस्य विश्लेषणमात्रं कुर्मः, परं तेन सह संघर्षरताः न भवामः। वैफल्येभ्यो जनैः काचित् शिक्षा ग्राह्या, किन्तु एतत्स्थाने जनाः तेषां कारणानां प्रभावानां च मीमांसां कुर्वन्ति। तेषां यथार्थम् अध्ययनं कृत्वा 'पुनश्च असफलतायै तानि कारणानि न भवेयुः' इति शिक्षां न लभन्ते। ईश्वरः समस्याभिः सङ्कटैश्च अस्माकम् अभिवृद्ध्ये सुयोगम् अर्पयति। अतएव यदा भवताम् मनोरथाः, स्वप्नाः लक्ष्यानि च विचूर्णितानि भवन्ति तदा तेषां भग्नावशेषेषु अन्वेषणं कर्तव्यम्। तत्र कश्चित् सुवर्णयोगः भवद्भिः अन्वेष्टुं शक्यते। जनान् प्रेरयितुं, तेषां कार्यशक्तिम् अनवरतं वर्धयितुं तेषाम् अवसादं दूरीकर्तुं सर्वदा सर्वथा च आवश्यकं समाह्वानं भवति। स एव नेता अस्ति यः प्रतिरोधस्य स्वीकरणक्रियायाः च मध्ये सन्तुलनं गवेषयति।

**5.** अधस्तनगद्यांशस्य संस्कृतभाषानुवादः करणीयः — 20

Freedom has assuredly given us a new status and new opportunities. But it also implies that we should discard selfishness, laziness and all narrowness of outlook. Our freedom suggests toil and the creation of new values for old ones. We should so discipline ourselves as to be able to discharge our responsibilities satisfactorily. If there is any one thing that needs to be stressed, it is that we should put in action our full capacity, each one of us in productive effort—each one of us in his own sphere, however, humble. Work, unceasing work, should now be our watchword. Work is wealth, and service is happiness. The greatest crime today is idleness. If we root out idleness, all our difficulties, including even conflicts, will gradually disappear. Whether as constable or high official of the state, whether as businessmen or industrialist, artisan or farmer, each one is discharging the obligation to the state, and making a contribution to the welfare of the country. Honest work is the anchor to which we should cling if we want to be saved from danger or difficulty. It is the fundamental law of progress.

**6.** *(a)* अधोलिखितानां स्वरचितवाक्येषु प्रयोगः कार्यः — 2×5=10

*(i)* साम्प्रतम्

*(ii)* अन्तरा

*(iii)* इत्थम्

*(iv)* उपरि

*(v)* ततः

www.prepp.in
Prepp
Your Personal Exams Guide

(b) पदसाधनं क्रियताम्— 1×10=10

(i) गो + सप्तमी, बहुवचनम्

(ii) कवि + पञ्चमी, एकवचनम्

(iii) दधि + तृतीया, एकवचनम्

(iv) धेनु + चतुर्थी, बहुवचनम्

(v) मातृ + द्वितीया, एकवचनम्

(vi) त्यज् + लोट्, प्रथमपुरुषे एकवचनम्

(vii) वृत् + लोट्, प्रथमपुरुषे एकवचनम्

(viii) स्मृ + लट्, प्रथमपुरुषे बहुवचनम्

(ix) वन्द् – मध्यमपुरुषे एकवचनम्

(x) अस् + लोट्, उत्तमपुरुषे बहुवचनम्

(c) समासो विधेयः, समासनाम च लेखनीयम्— 2×5=10

(i) दिनं दिनं प्रति

(ii) कमलमिव मुखं यस्य सः

(iii) गृहं गतः

(iv) नराणां पतिः

(v) पाणी च पादौ च

(d) अधोलिखितानि वाक्यानि शुद्धीकरणीयानि— 2×5=10

(i) मम ग्रामेण देवालयः अस्ति।

(ii) रामं भोजनं रोचते।

(iii) मन्दं मन्दं वायुं वहति।

(iv) रामः राधिकया वदति।

(v) ज्ञानस्य विना मुक्तिर्न भवति।

★ ★ ★